॥ श्रीः ॥

॥ श्रीभारतसारसंग्रहस्तोत्रम् ॥

अथ श्रीमहाभारतस्य शिवपारम्यप्रख्यापनपरतामाविष्कर्तुं कृतस्य स्तोत्रस्यायमाद्यः श्लोकः—

श्रीबादरायणमुनिः स्वयमेव विष्णुः
पार्थच्छलात्तमधिकृत्य कृते प्रबन्धे ।
तस्यापि नित्यमहितं शशिभूषण त्वा-
माम्रेडयन्गुरुरदर्शयदादितत्त्वम् ॥ १ ॥

श्रीबादरायणनामा प्रसिद्धो मुनिः स्वयमेव विष्णुः, 'कृष्णद्वैपायनं व्यासं विद्धि नारायणं स्वयम् । को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत् ॥' इति सूतवचनात् । स च महाभारताख्यं प्रबन्धं पार्थचरितवर्णनात्मकं तदनुषक्तश्री-

कृष्णचरितान्तर्गतन्माहात्म्यवर्णनात्मकं च निर्ममे, ' वासुदेवस्य माहात्म्यं पाण्डवानां च सत्यताम् । दुष्टतां धार्तराष्ट्राणामुक्तवान्भगवानृषिः ॥ ' इति वचनात् । अत्र च प्रबन्धे पार्थानां नायककिरणं व्याजमात्रम् । तत्संरक्षणजागरूकश्रीकृष्णमाहात्म्यवर्णनात्मकमेव तत्प्रवृत्तम् , तद्वाहुल्यात्तदधीनत्वाच्च पार्थानां राज्यलाभस्य, भारतस्यादौ 'नमो भगवते तस्मै व्यासायामिततेजसे । यस्य प्रसादाद्वक्ष्यामि नारायणकथामिमाम् ॥' इति श्रीसूतवचने श्रीमहाभारतस्य नारायणकथेत्येव व्यवहृतत्वाच्च । एवंभूतं श्रीमहाभारतं कुर्वाणः सर्वेषां ब्रह्मविदां गुरुर्भगवान्व्यासः श्रीकृष्णमाहात्म्यवर्णनद्वारा शिव एव परं ब्रह्मेति शिष्येभ्यः परं तत्त्वं दर्शयामास । किं कुर्वन्? तस्य श्रीकृष्णस्यापि नित्यमर्हितं नित्यपूजितम् , तेनापि कृष्णेन कृष्णावतारूपेण प्राक्परिगृहीतैः पूर्वपूर्वरूपैः परवासुदेवात्मकमूलरूपेण च सदा पूज्यमानमिति यावत् । एवंभूतं शिवमाम्रेडयन्पुनःपुनः कथयन्सन् । प्रायः सर्वत्रापि हि महाभारते श्रीकृष्णस्य शिवपूजानिष्ठत्वं तत्प्रभावलब्धसकलप्रभाववत्त्वं च वर्ण्यते । तत्र तावत्सौप्तिकेऽश्वत्थामानं प्रति शिववचनम्— ' सत्यशौचार्जवत्यागैस्तपसा नियमेन च । क्षान्त्या भक्त्या च धृत्या च कर्मणा मनसा

गिरा ॥ अहं यद्भवताराध्यः कृष्णेनाक्लिष्टकर्मणा । तस्मा-
दिष्टतमः कृष्णादन्यो मम न विद्यते ॥' इति ; आदिपर्वणि
च सुभद्रापरिणयप्रस्तावे समुद्रमध्ये क्वचिद्द्वीपविशेषे कृष्णेन
शिवस्य पूजार्थं प्रवर्तितो महोत्सवः प्रपञ्चितः ; उपमन्यूप-
देशेन श्रीकृष्णस्यापि द्वादशाब्दावधि पाशुपतव्रतानुष्ठानपू-
र्वकं शिवाराधनमानुशासनिके पर्वणि प्रपञ्चेन प्रतिपादितं
सुप्रसिद्धम ; भारतशेषे च हरिवंशे पार्थचरितं विहाय कृष्ण-
चरितमेव निबन्द्धुं कृते, पारिजातसंहितायां कैलासयात्राया-
मन्यत्र च तत्र तत्र पूजास्तुतितपोभिः कृष्णेन शिवप्रीणन-
मेव कृतमिति प्रपञ्चेन वर्णितम् ; द्रोणपर्वणि द्रोणवधान-
न्तरं क्रोधेन स्वप्रहितं कृष्णार्जुनयोर्वितथीभूतमाग्नेयास्त्रं दृष्ट्वा
व्रीडया धिग्धिगिति शस्त्रं परित्यज्य दक्षिणां दिशं प्रस्थित-
मश्वत्थामानं प्रति मार्गे समागतस्य श्रीवेदव्यासस्य तद्व्री-
डापनयनार्थं वचनम्— 'देवदेवस्त्वचिन्त्यात्मा अजेयो वि-
ष्णुरव्ययः । सर्वरूपं भवं ज्ञात्वा लिङ्गेऽर्चयति यः प्रभुम् ॥
तस्मिन्नभ्यधिकां प्रीतिं करोति वृषभध्वजः ॥' इति ; तत्रैव
कृष्णार्जुनौ पूर्वं नरनारायणावृषी, ताभ्यां च लिङ्गेऽर्चनया
षष्टिं वर्षसहस्राणि शिवमाराधितवद्भ्यां शिवेनातुलबलवीर्य-
पराक्रमादयो बहवो वरा दत्ता इति वेदव्यासेन कथिते

अहं किं न शिवपूजक इति कृतानुयोगमश्वत्थामानं प्रति तस्यैव वचनम्— 'जन्मकर्मतपोयोगास्तयोस्तव च पुष्कलाः । ताभ्यां लिङ्गेऽर्चितो देवस्त्वयार्चायां युगे युगे ॥' इति; इदं च मैनाके श्रीकृष्णस्य तपश्चरणं बहुवरलाभश्चेत्युभयं पारिजातजिहीर्षया शिवं संपूज्य स्तुवन्कृष्णः शिवेनैव स्मारितः— 'इति संस्तूयमानस्तु भगवान्गोवृषध्वजः । प्रसार्य दक्षिणं बाहुं वासुदेवमथाब्रवीत् ॥ मनीषितानामर्थानां प्राप्तिस्तेऽस्तु सुरोत्तम । पारिजातं च हर्तासि मा भूत्ते मनसो व्यथा ॥ पुरा मैनाकमाश्रित्य तपस्त्वमकरोर्यदा । तदा मम वचः कृष्ण संस्मृत्य स्थैर्यमाप्नुहि ॥ अवध्यस्त्वमजेयस्त्वं मत्तः शूरतरस्तथा । भवितासीत्यवोचं यत्तत्तथा न तदन्यथा ..' इति । एवं श्रीकृष्णस्य स्वरूपपूर्वगृहीतरूपैः कृते शिवाराधनेऽनेकानि वचनान्युदाहृतानि । तस्य मूलरूपेण कृतं शिवाराधनं ततो वरलाभश्चेत्युभयमारण्यपर्वणि तीर्थयात्राविधौ दर्शितम— 'ततोऽगच्छत्सुपर्णाख्यं त्रिषु लोकेषु विश्रुतम् । यत्र विष्णुः प्रसादार्थं शिवमाराधयन्पुरा ॥ वरांश्च सुबहूल्लेभे देवैरपि सुदुर्लभान् । दत्तांश्च त्रिपुरघ्नेन परितुष्टेन भारत ॥ अपि चान्यैः प्रियतमो लोके कृष्ण भविष्यसि । त्वन्मुखं च जगत्सर्वं भविष्यति न संशयः ॥' इति । अन्यैः प्राचीनत्व-

रुचरितेभ्योऽन्यैर्मद्वरदानलब्धसामर्थ्येन करिष्यमाणैर्देवमनुष्यादिकण्टकासुरराक्षसादिवधैर्लोके भूम्यन्तरिक्षस्वर्गादौ सर्वत्र प्रियतमो देवमनुष्यादीनां प्रीतिविषयो भविष्यसि, अत एव जगत्सर्वं त्वन्मुखं त्वत्प्रधानं च भविष्यतीत्यर्थः । एवं देवादिकण्टकवधेन भावितस्य दोषस्य प्रायश्चित्तमपि शिवाराधनरूपमेव भगवता कृतमिति तीर्थयात्राविधाने पठ्यते— 'तीर्थं कुरु कुलश्रेष्ठ त्रिषु लोकेषु विश्रुतम् । प्रभीतिनाम्ना विख्यातं सर्वपापविमोचनम् ॥ यत्र ब्रह्मादयो देवा महेश्वरमुपासते । तत्र स्नात्वार्चयित्वा च रुद्रं देवगणेश्वरम् । जन्मप्रभृति पापानि कृतानि तुदते नरः ॥ देवी यत्र नरश्रेष्ठ सर्वदेवैरभिष्टुता । तत्र स्नात्वा नरश्रेष्ठ हयमेधमवाप्नुयात् ॥ इष्ट्वा यज्ञं महाप्राज्ञ विष्णुना प्रभविष्णुना । पुरा शौचं कृतं राजन्हत्वा दैवतकण्टकान् ॥' इति । अत्र शौचशब्देन शिवाराधनमेव प्रायश्चित्तमुक्तम्, 'यत्र ब्रह्मादयो देवा महेश्वरमुपासते' इति संनिधानपाठात् । तीर्थयात्राविधावेव नारायणादिसहितस्य हिरण्यगर्भस्य शिवभक्ताराधनोक्त्या कैमुतिकन्यायेन शिवाराधकत्वमपि नारायणस्य विभावितम् । 'ततो गच्छेत राजेन्द्र तीर्थं शतसहस्रकम् । सहस्रकं च तत्रैव द्वे तीर्थे लोकविश्रुते ॥ उभयोर्हि नरः स्नात्वा गोसहस्रफलं लभेत् ॥ अत्र

ब्रह्मा स्वयं नित्यं देवैः सह महीपते । अन्वास्यते कुरुश्रेष्ठ नारायणपुरोगमैः ॥ सांनिध्यं तत्र राजेन्द्र रुद्रपत्न्याः कुरूद्वह । अर्चयित्वा तु तां देवीं न दुर्गतिमवाप्नुयात् ॥' इति । अत्र क्षेत्रे देवीसांनिध्यस्य तदर्चनतत्फलयोश्च वचनेन संभूय स्थितैर्नारायणादिभिर्देवैरन्वास्यमानस्य ब्रह्मणो वा स्थानं देव्याराधनार्थमित्याशय उच्यते । आनुशासनिके च 'यस्य ब्रह्मा च विष्णुश्च त्वं च शक्र महामरैः । अर्चयध्वे सदा लिङ्गं तस्मात्पूज्यतरो हि कः ॥' इत्युपमन्युवचनेन ब्रह्मविष्ण्वादीनां नित्यमेव शिवाराधकत्वं स्पष्टीकृतम् । एवं सौप्तिकादिष्ववताररूपस्य श्रीकृष्णस्य शिवपूजनेन सकलवरलाभोक्त्या भारते साक्षात्प्रतिपादितनिरतिशयप्रभावशालिनः साक्षात्परब्रह्मेति संभाव्यमानात्ततोऽपि तत्पूज्यस्य शिवस्य यत्पारम्यं व्यञ्जनावृत्त्या प्रतीयते तदेव श्रीमहाभारतस्य वाच्यनारायणचरितद्वारा व्यज्यमानं श्रीमहाभारतस्य प्रधानं प्रतिपाद्यम् । श्रीमहाभारतं हि महदत्युत्कृष्टं काव्यम् , 'कृतं मयेदं भगवन्काव्यं परमम्' इति ब्रह्माणं प्रति व्यासवचनात् । ब्रह्मणा च 'त्वया च काव्यमित्युक्तं तस्मात्काव्यं भविष्यति' इत्युक्त्वा काव्यस्य सतः कीदृक्काव्यत्वमाशास्यत इत्याकाङ्क्षायाम् 'अस्य काव्यस्य

कवयो न समर्था विशेषणे । विशेषणे गृहस्थस्य शेषाश्रय इवाश्रमाः ॥' इति । तदनन्तरमेतदतिशायि काव्यं कोऽपि न करिष्यतीत्यस्यैव यत्सर्वातिशायिकाव्यत्वं तदाक्षास्यत इति विभावनाच्च । 'सर्वेषां कविमुख्यानामुपजीव्यो भविष्यति । पर्जन्य इव भूतानामक्षयो भारतद्रुमः ॥' इति तदनन्तरं भारतस्य करिष्यमाणसर्वकाव्योपजीव्यत्ववचनाच्च । अस्योत्कृष्टस्य चोत्तमकाव्यस्य वाच्यातिशायि यद्व्यङ्ग्यमस्ति तदेव प्रधानं न तु वाच्यम् । यथाहुः—'प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् । यत्तत्प्रसिद्धावयवातिरिक्तमाभाति लावण्यमिवाङ्गनासु ॥" इति । इह तु वाच्यः परब्रह्मत्वसंभावनावहो नारायणस्य निरतिशयमहिमा । तस्यापि पूज्यतया सर्वत्र निबद्धस्य शिवस्य तदतिशायिसगुणपरब्रह्मभावरूपो महिमा व्यज्यमानः । अयमेव वस्तुध्वनिरूपः । स हि तत्र व्यज्यमानैर्भावरसालंकारध्वनिभिरुपस्कृतः प्रधानतया प्रबन्धुराशयस्थित उन्नीयत इति भावः ॥ १ ॥

अथ विधान्तरेणापि भारते शिवस्य परब्रह्मभावाभिव्यक्तिमाविष्करोति—

मोहाभिभूतमखिलं जगदाविरिञ्चं
त्वामेकमेव भगवन्नहितं च तेन ।
विख्याप्य मङ्कणकदिव्यकथानुषक्त्या
त्वां ब्रह्म तेन च मुनिः स्फुटयांबभूव ॥

आरण्यपर्वणि तीर्थयात्राविधौ सप्तसारस्वततीर्थप्रसङ्गे 'यत्र मङ्कणकः सिद्धः—' इत्युपक्रम्य दर्भक्षतात्तस्य करतः शाकरसस्तुतिमुक्त्वा पठितम्— 'स वै शाकरसं दृष्ट्वा हर्षाविष्टो महातपाः । प्रनृत्तः किल विप्रर्षिर्विस्मयोत्फुल्ललोचनः ॥ ततस्तस्मिन्प्रनृत्ते वै स्थावरं जङ्गमं च यत् । प्रनृत्तमुभयं वीर तेजसा तस्य मोहितम् ॥ ब्रह्मादिभिः सुरै राजन्नृषिभिश्च तपोधनैः । विज्ञप्तो वै महातेजा ऋषेरर्थे नराधिप ॥ यथा न नृत्यते विप्रस्तथा त्वं कर्तुमर्हसि ॥ ततः प्रनृत्तमासाद्य हर्षाविष्टेन चेतसा । सुराणां हितकामार्थमृषिं देवोऽभ्यभाषत ॥ विभो महर्षे धर्मज्ञ किमर्थं नृत्यते भवान् । हर्षस्थानं किमर्थं वा तवाद्य मुनिपुंगव ॥ ऋषिः— 'किं न पश्यसि मे देव कराच्छाकरसस्रुतम् । यद्दृष्ट्वाहं प्रनृत्तो वै हर्षेण महतान्वितः ॥' 'तं प्रहस्याब्रवीद्देवो मुनिं रागेण मोहितम् । अहं वै विस्मयं विप्र दर्शयाम्यत्र पश्य माम् ॥ एवमुक्त्वा नरश्रेष्ठ महादेवेन वै तदा । अङ्गुष्ठाग्रेण राजेन्द्र स्वाङ्गुलि-

स्ताडिताभवत् ॥ ततो भस्म क्षताद्राजान्निर्गतं हिमसंनिभम् । तद्दृष्ट्वा व्रीडितो राजन्स मुनिः पादयोर्गतः ॥' इति । अत्र ब्रह्मादिस्थावरान्तस्य सकलस्य जगतो मङ्कणकनृत्तेन मोह उक्तः । मोहवन्मङ्कणकवशान्नृत्यतां ब्रह्मादीनां प्रार्थनया शिवेन मङ्कणकनृत्यस्य विरामः कारित इत्युक्त्वा शिवस्य ब्रह्मादिवन्मोहो नास्तीति व्यञ्जितम् । अन्यथा स्वयं ततो मोहवशं गतस्य तद्विरामकरणसामर्थ्यासंभवेन शिवं प्रति देवानां तद्विरामकरणप्रार्थनानुपपत्तेर्देवाः सर्वे मोहवशं गता ब्रह्मैकं मोहानभिभूतमिति सर्वं संप्रतिपन्नम् । अहो मोहतदभावकृताद्विशेषाद्देवाः सर्वे जीवाः शिव एव परं ब्रह्मेति वेदव्यासो विभावयामासेत्यर्थः ॥ २ ॥

अत्र स्वदृढगमकत्वेन वाक्यशेषलब्धमर्थं गृह्णाति—

तस्माच्च मोहतदभावकृताद्विशेषा-
ज्जन्मस्थितिप्रलयभागखिलं त्वदन्यत् ।
तत्कर्तृ वस्तु परमं त्वमिति प्रबोधं
जातं विभावयति तस्य तदीयवाचा ॥

शिवस्य पादयोः प्रणिपातानन्तरमिदं मङ्कणकवचनं पठितम्— 'नान्यं देवमहं मन्ये रुद्रात्परतरं महत् । सुरा-

सुरस्य जगतो गतिस्त्वमसि शूलधृक् ॥ त्वया सृष्टमिदं सर्वं त्रैलोक्यं सचराचरम् । त्वामेव भगवन्सर्वे प्रविशन्ति युगक्षये ॥ देवैरपि न शक्यन्ते परं ज्ञातुं कुतो मया । त्वयि सर्वेऽपि दृश्यन्ते सुरा ब्रह्मादयोऽनघ ॥ सर्वस्त्वमसि लोकानां कर्ता कारयिता च ह । त्वत्प्रसादात्सुराः सर्वे निवसन्त्यकुतोभयाः ॥' इति । अत्र शिवस्य सकलजगत्सर्गप्रलयावधिसार्वात्म्यादुक्त्या शिव एव परं ब्रह्मेति निश्चिकाय मङ्कणक इत्युन्नीयते । तान्निश्चयश्च न भस्मनिर्गमनकृतः, शाकरसानिर्गमनवद्विस्मयहेत्वार्षवृत्तत्वेनान्यथासिद्धेः । किं तु मम नृत्तं दृष्ट्वा सर्वस्मिन्नापे जगत्याहिरण्यगर्भे मोहिते नृत्यत्यपि शिवो मोहराहित्यान्नृत्यरहित एव स्वयं मत्समीपमागत्य मन्नृत्योपरतिमचीकरादित्येव शिवस्य मोहाभावनिश्चयः कृतः । अतो मङ्कणकवचनमुखेनापि शिव एव परं ब्रह्मेति विभावयामासेत्यर्थः । अत्र पूर्वश्लोकप्रकृतो मुनिः कर्ता । एवं मङ्कणककथोदाहरणेन शिवस्य परब्रह्मभावाभिव्यक्तिराविष्कृता ॥ ३ ॥

क्वचित्कृष्णवृत्तान्तोदाहरणेनापि तामाविष्करोति—

कैलासशैलशिखरे हरिपार्थदृष्टं
त्वां ब्रह्म नाथ परमं समुदीर्ण साक्षात् ।

तल्लक्षणं स्वयमनन्यतदीयधर्म-
क्रान्ते क्रियच्च भवति स्फुटमाचचक्षे ॥

कृष्णार्जुनौ पाशुपतास्त्रसंधानप्रकारविशेषजिज्ञासया यदा कैलासं गतौ तदा तन्माहिमवर्णनमेवं कविना कृतम्—'संस्तूय मां स्तवैर्दिव्यैर्ऋषिभिर्ब्रह्मवादिभिः । गोप्तारं सर्वलोकानामिष्ट्वा स वरमच्युतम् ॥ वासुदेवस्तु तं दृष्ट्वा जगाम शिरसा क्षितिम् । पार्थेन सह धर्मात्मा गृह्णन्ब्रह्म सनातनम् ॥ लोकादिविश्वकर्माणमृषिमीशानमव्ययम् । तमसः परमं ज्योतिः स्वयंभुज्योतिषां गतिम् ॥ स्रष्टारं वारिधाराणां भुवश्च प्रकृतिं पराम् । देवदानवयक्षाणां मनुष्याणां च शासकम् ॥ योगिनां परमं ब्रह्म व्यक्तं वेदविदां निधिम् । परापरस्य स्रष्टारं प्रतिहर्तारमेव च ॥ कालकेयं महात्मानं शक्रसूर्यगुणोदयम् । ववन्दतुस्तथा कृष्णौ वाङ्मनोबुद्धिकर्मभिः ॥ यं प्रपश्यन्ति विद्वांसः सूक्ष्माध्यात्मनिदर्शनात् । तमजं कारणात्मानं जग्मतुः शरणं भवम् ॥' इति । अत्र 'योगिनां परमं ब्रह्म' इति कण्ठतः शिवस्य परब्रह्मभाव उक्तः । तदुपासनार्थं परमानन्दरूपत्वं ब्रह्मणः स्वरूपलक्षणं तत्र 'व्यक्तं वेदविदां निधिम्' इत्यनेन दर्शितम् । अतिदरिद्रस्य पुरस्तादकस्मादाविर्भूतो हि महानिधिः साक्षात्कृतस्य निरतिशयब्रह्मानन्दस्यो-

र्यमानतया वक्तुमुचितः । वस्तुतस्तस्य निधेरुपमेयापेक्षया हीनत्वेऽपि लोकदृष्ट्या तदपेक्षयाधिकाभावात् 'आकाशवत्सर्वगतश्च नित्यः' इतिवदुपमानतया निवेशनं युक्तमिति बदात्मतया ब्रह्मानन्दस्य निरूपणम् । 'तमसः परमं ज्योतिः —' इति श्लोकेन नित्यमुक्तस्वरूपब्रह्मधर्मप्रदर्शनपूर्वकम् 'आत्मन आकाशः—' इत्यादिश्रुतिसिद्धं वियदादिकारणत्वरूपं तटस्थलक्षणं तत्र दर्शितम् । अन्ये चाध्यात्मवदृश्यमानत्वगोप्तृत्वशासकत्वादयः परब्रह्मधर्मा वर्णिताः । ब्रह्म सनातनमिति शिव एवोक्तः । यदि वा प्रणवः । उभयथापि परब्रह्मरूपत्वं तद्धर्मः प्रणवार्थत्वं वा तेन दर्शितम् ॥ ४ ॥

अथ प्रदेशान्तरेऽपि कृष्णवृत्तान्तेन तदभिव्यक्तिमाविष्करोति—

नारायणस्य सुचिरं त्वदुपासकस्य
यद्ब्रह्मभावमवदत्तव भावनासम् ।
यत्ते स्तुतिं तदुदितां परभावगर्भां
त्वां ब्रह्म तेन च मुनिः स्फुटयांचकार ॥

द्रोणपर्वणि नारायणस्य मैनाके तपश्चर्योक्ता— 'ऊर्ध्वबाहुर्महातेजा ज्वलनादित्यसंनिभः । षष्टिवर्षसहस्राणि तावन्त्येव शतानि च ॥ व्यशोषयत्तदात्मानं वायुभक्षोऽम्बुजे-

क्षणः । अथापरतपस्तप्त्वा द्वितीयोऽन्यत्पुनर्महत् ॥ द्यावा-पृथिव्योर्विवरं तेजसा समपूरयत् । स तेन तपसा तत्र ब्रह्मभूतो यथा भवेत् ॥' इति । अत्र तपश्चर्याकाले शिवं ध्यायतो नारायणस्य शिवोऽहंभावभावनाभावितः शिवभाव एव ब्रह्मभूत इत्यनेनोक्तः, ततोऽन्यस्य तेन प्राप्यस्य ब्रह्म-भावस्याभावात् । अत एव तपसा प्रसन्ने शिवे प्रत्यक्षे सति नारायणेन बहुधा परब्रह्मधर्मैः स्तवः कृतः— 'स जानु-भ्यां महीं गत्वा कृत्वा शिरसि चाञ्जलिम् । पद्माक्षस्तं विरू-पाक्षमभितुष्टाव भक्तिमान् ॥ त्वद्भूता वै भूतकृतो वरेण्यं गोप्तारो ये भुवनस्य गोपाः । प्रवेश्य मां धरणीं ये ह्यरक्षन्पुरा पुराणी तव देव दृष्टिः ॥ शक्त्या लोका यथा यान्ति पृथ-क्त्वां ताभिश्चैक्यं संक्षये यान्ति भूयः । एवं विद्वान्प्रभवं चाप्ययं च त्वत्संभूतं तव सायुज्यमेति ॥ भूतं भव्यं भावि यच्चाप्यदृष्टं त्वत्संभूताः सर्व इमे हि लोकाः । भक्तं च मां भजमानं भजस्व प्रीत्या मां वै लोकपितर्महेश ॥' इति । एवं नारायणं शिवोऽहंभावभावितशिवभावं ब्रह्मभूतशब्देनावदत् । नारायणकृतां शिवस्तुतिं च सकलप्रपञ्चसृष्टिसंहारादिरूपपर-ब्रह्मधर्मबृंहितामनुवदन्वेदव्यासः शिवस्य परब्रह्मभावं व्य-ञ्जितवानित्यर्थः ॥ ५ ॥

अथ शिवे निरुपपदब्रह्मपदप्रयोगः कृतः, तस्य परब्रह्मभावाभिव्यक्तिमाविष्करोति—

मूलं कृष्णो ब्रह्म च ब्राह्मणाश्चे-
त्यादावेवं ब्रह्मभावं महेश ।
पार्थानां ते नित्यसंरक्षकस्य
व्यासस्तत्रोद्घाटयामास शंभो ॥ ६ ॥

भारतोपक्रमे 'युधिष्ठिरो धर्ममयो महान्द्रुमः स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखा । माद्रीसुतौ पुष्पफले समृद्धे मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च ॥' इति युधिष्ठिरस्य द्रुमत्वरूपणे कृष्णवद्ब्राह्मणवच्च ब्रह्मपदेनोक्तः कश्चिन्मूलत्वेन निरूपितः । कृष्णस्य ब्राह्मणानां च मूलत्वरूपणे राजभावोपगूढयुधिष्ठिरस्थितिहेतुत्वं निमित्तम् । तच्च सर्वविधसाहायकादिना तदीयराज्यप्राप्तिहेतोः श्रीकृष्णस्य सुप्रसिद्धमेव । ब्राह्मणानां तु जयाशिषा तत्प्रसिद्धम् । आरण्यपर्वण्यरण्यं प्रस्थिते युधिष्ठिरे तमनुव्रजतोऽग्निहोत्रादिसहितान्भोजयितुमशक्त्या निवर्तध्वमिति तेन प्रार्थितानां ब्राह्मणानाम्— 'स्वयमाहृत्य वन्यानि अनुयास्यामहे वयम् । अनुध्यानेन जप्येन विधास्यामः शिवं तव ॥' इति वचनेन तथैवानुव्रजनेन पश्चादाश्वा-

अपात्रं लब्ध्वा तत्रापाकतः समृद्धमन्नं प्रतिलभ्य तेषां सर्वेषां भरणवचनेन प्रीयमाणानां तज्जयमाशासानानां तेषाम् 'ब्राह्मणानां सहस्राणि स्नातकानां महात्मनाम् । दशमोक्षविदां तद्वच्चान्बिभर्ति युधिष्ठिरः ॥' इति । तदुपरितनाध्यायान्तरगतसंख्यावचनेन व्यक्तीकृतमेतद्वरदत्तेनापि । एवमेव ब्रह्मपदोक्तेन ब्रह्मपदार्थेन तद्राज्यप्राप्तिकारिणा भवितव्यम् । वेदतपस्वी यद्यपि राज्यप्राप्तिहेतुधर्मानुष्ठानप्रभृतिद्वारेणापूर्वद्वारेण च तद्राज्यप्राप्तिकारी तथापि तेन मध्यपाठो नाचेतनयोर्युक्तः, प्रायपाठविरोधात् । अतः शिव एव तत्र ब्रह्मपदेनोक्तो ज्ञायते । तस्य हीतरापेक्षयाप्यधिकं सकलशत्रुवधद्वारा तदीयराज्यप्राप्तिहेतुत्वं भारत एवारण्यपर्वणि किरातार्जुनीये द्रोणपर्वणि कैलासगमने, तत्रैव शतरुद्रीये, तत्रैव सौप्तिके पर्वणि शान्तिपर्वण्याश्वमेधिकपर्वण्यन्यत्रापि तत्र तत्र च सुप्रसिद्धानि वचनानि ब्रह्मतर्कस्तवविवरणे समुदाहृतानि द्रष्टव्यानि । एतेन ब्रह्म चेति कृष्णस्यैव विशेषणमस्तीत्याशङ्का निरस्ता, कृष्णादप्यधिकतरं पाण्डवसंरक्षकस्य शिवस्य मूलत्वनिरूपणे प्रहणावश्यंभावात् ॥ ६ ॥

अथ शिवस्य ब्रह्मविष्ण्वादिप्रलयकर्तृत्ववचनैरपि तस्य परब्रह्मताभिव्यक्तिमाविष्करोति—

ब्रह्मा विष्णुः शंकरश्चेति देवाः
कर्तारो ये सर्गरक्षालयानाम् ।
तेषां सृष्टिं संहृतिं च त्वदिच्छा-
धीनामूचे द्योतयन्ब्रह्मतत्त्वम् ॥

शिवस्य त्रिमूर्तिस्रष्टृत्वमानुशासनिके प्रतिपादितम् — 'स एष भगवानीशः सर्वतत्त्वादिरव्ययः । सर्वतत्त्वविधा-नज्ञः प्रधानपुरुषेश्वरः ॥ सोऽसृजद्दक्षिणादङ्गाद्ब्रह्माणं लोक-संभवम् । वामपार्श्वात्ततो विष्णुं लोकरक्षार्थमीश्वरः । युगा-न्ते चैव संप्राप्ते रुद्रं प्रभुमथासृजत् ॥' इति । किं च तेषा-मापन्निवारणादिना तस्य शिवस्य तत्संरक्षकत्वं शान्ति-पर्वणि प्रतिपादितम्— 'यं विष्णुरिन्द्रः शंभुश्च ब्रह्मा लोकपितामहः । स्तुवन्ति विविधैः स्तोत्रैर्देवदेवं महेश्वरम् । तमर्चयन्ति ये शश्वद्दुर्गाण्यतितरन्ति ते ॥' इति । अत्र शिवाराधनस्य दुर्गातितरणकारणत्वोक्त्या विष्ण्वादीनां स्तो-त्रमपि तदर्थमिति व्यवसायात्स्तुतिभिः प्रीतस्य तस्य शिवस्य तत्संरक्षकत्वं विवक्षितमित्यवसीयते । शिवस्य तत्संहर्तृत्व-मपि शान्तिपर्वण्युक्तम् — 'ईश्वरश्चेतनः कर्ता पुरुषः कारणः शिवः । विष्णुर्ब्रह्मा शशी सूर्यः शक्रो देवाश्च सान्वयाः ॥ सृज्यते प्रस्यते चैव तमोभूतमिदं यदा । अप्रज्ञातं जग-

त्सर्वं तदा ह्येको महेश्वरः ॥' इति । अत्र संहारुद्रस्यापि ग्रासो विवक्षितः, 'तदा ह्येको महेश्वरः' इति वाक्यशेषात् । मूलश्लोके 'सृष्टिं संहृतिं च' इति चकारेण रक्षा सूचिता । एवं ब्रह्मविष्णुरुद्राणामपि सृष्टिस्थितिप्रलयकर्ता, कैमुतिकन्यायेन सर्वस्य जगतः कर्तेति सिद्धेः; तत् 'यतो वा इमानि भूतानि जायन्ते' इत्यादिलक्षणलक्षितं ब्रह्म शिव एवेत्यर्थात्सिध्यतीति तद्द्योतनार्थं तदुक्तवानित्यर्थः । द्योतयन्निति हेतौ शतृप्रत्ययः ॥ ७ ॥

ननु भारते क्वचित्क्वचिच्छिवस्य विरिञ्चान्नारायणाच्चापकर्षोऽपि प्रतिपादितो दृश्यते; कथं तदुपपत्तिरित्याशङ्क्याह—

विशालाक्षः स्थाणुर्हुहिणतनयः संहरणकृ-
त्सरोजाक्षक्रोधप्रभव इति वैशेषिकपदम् ।
विभूतित्वज्ञप्त्यै किमपि निहितं नाथ नियतं
निकर्षोक्तिस्ताभ्यां भवत इति बुद्धिं निरसितुम् ॥

सन्ति त्रिमूर्तिकारणस्य मायाधिष्ठातृसगुणब्रह्मरूपस्य श्रीसाम्बशिवस्य विभूतिविशेषरूपा रुद्राः । यथा संहारुद्रो लोकसृष्ट्यर्थं लोकरक्षार्थं च विरिञ्चात्स्वेच्छया प्रादुर्भूतस्तद-

वतारूपः, अवान्तरकल्पेषु संहारार्थं हरिक्रोधात्स्वेच्छया प्रादुर्भूतश्च तदवतारूपो रुद्रः, अन्ये च नीललोहितो लोकपाल इत्यादयो रुद्राः । अत्र ब्रह्माङ्गसंभूतो रुद्रो महाभारते दर्शितः— 'अनादिनिधनो देवश्चैतन्यादिसमन्वितः । ज्ञानानि च वशे यस्य तारकादीन्यशेषतः ॥ अणिमादिगुणोपेतमैश्वर्यं न च कृत्रिमम् । सृष्ट्यर्थं ब्रह्मणः पुत्रो ललाटादुत्थितः प्रभुः ॥' इति । हरिक्रोधप्रभवः कौर्मे शिववचनेन दर्शितः— 'अहं च भवतो वक्त्रात्कल्पान्ते घोररूपधृत् । शूलपाणिर्भविष्यामि क्रोधजस्तव पुत्रकः ॥' इति । नीललोहितनामा कश्चिद्रुद्रो महाभारते कृष्णार्जुनयोः कैलासगमनप्रस्तावे कैलासे शिवपार्श्वस्थितो वर्णितः— 'ततः पार्श्वे वृषाङ्कस्य ब्रह्मचारी व्यवर्धत । पिङ्गाक्षस्तपसा श्रेष्ठो बलवान्नीललोहितः ॥' इति । लोकपालरुद्रः प्रागुदीच्यां दिशि वसन्कूर्मपुराणे दर्शितः— 'तत्रेशानस्य भवनं रुद्राद्यष्टतनोः शुभम् । गणेश्वरस्य विपुलं तत्रास्ते स गणैर्वृतः ॥' इति । एतेषु ब्रह्माङ्गभवस्य स्थाणुर्विशालाक्ष इति वैशेषिकनामानि । तत्र ब्रह्मणा सृष्ट्यर्थं नियुक्तस्य जरामरणरहितान्स्वात्मतुल्यानसंख्यातान्रुद्रान्सृष्टवतः 'जरामरणयुक्तान्सृज' इति ब्रह्मणो वचनं श्रुत्वा 'नैवंविधविशेषसृष्टिर्मया क्रियते'

इत्युक्तवतस्तदनन्तरं ब्रह्मणा सृष्टिव्यापाराद्व्यावर्तितस्य निर्व्यापारतयावस्थानं तत्र स्थाणुशब्दप्रवृत्तौ निमित्तं पुराणेषु दर्शितम् — 'स्वात्मजैरेव ते रुद्रैर्निवृत्तात्मा व्यतिष्ठत । स्थाणुत्वं तेन तस्याभूद्देवदेवस्य शूलिनः ॥ ततः प्रभृति विश्वात्मा न प्रसूते शुभाः प्रजाः । स्थाणुवन्निश्चलो यस्मात्स्थितः स्थाणुरतः स्मृतः ॥' इति । एतस्य विशालाक्ष इति नाम तु महाभारत एव राजधर्मे ब्रह्मप्रणीतं नीतिशास्त्रं प्रस्तुत्य— 'ततस्तां भगवान्नीतिं पूर्वं जग्राह शंकरः । बहुरूपो विशालाक्षः शिवः स्थाणुरुमापतिः ॥ स एव सर्वभूतात्मा महादेवः सनातनः । असंख्यातसहस्राणां रुद्राणां स्थानमव्ययम् ॥ युगानामायुषो ह्रासं विज्ञाय भगवान्शिवः । संचिक्षेप ततः शास्त्रं महार्थं ब्रह्मणा कृतम् । वैशालाक्षमिति प्रोक्तं तदिन्द्रः प्रत्यपद्यत ॥' इति स्थाणुशब्दिते तस्मिन्विशालाक्षपदप्रयोगेण तत्कृते नीतिशास्त्रे वैशालाक्षनामकीर्तनेन च दर्शितम् । अयमेव स्थाणुविशालाक्षादिशब्दितो रुद्रो महाभारते सर्वेषु शिवचरितेषु प्रतिपाद्य इति मन्दधियां शङ्कापिशाचिका च महाभारत एव तस्य शिवोपासकेषु शिवनिय-म्येषु च परिगणनेन व्यावर्तिता । तत्र सभापर्वणि भीष्मपर्वणि च—'यत्र भूतानि संसृष्ट्वा सर्वलोकान्महेश्वरः । उपास्यते ति-

ग्मतेजोवृतो भूतैः सहस्रशः ॥' इत्युपास्यस्य शिवस्य मैनाके संनिधानमुक्त्वा— 'नरनारायणौ ब्रह्मा यमः स्थाणुश्च पञ्चमः । उपासते यत्र परं सहस्रयुगपर्यये ॥' इति तदुपासकेषु परिगणनं कृतम । राजधर्मे— 'भूयः स भगवान्ध्यात्वा चिरं शूलवरायुधः । तस्य तस्य निकायस्य च कारैकैकमीश्वरम् । देवानामधिपं चक्रे देवं दशशतेक्षणम् ॥' इत्युपक्रम्य 'रुद्राणामपि चेशानं गोप्तारं विदधे प्रभुः । महादेवं महात्मानं विशालाक्षं सनातनम ॥' इति तस्य शिवनियम्येषु परिगणनं कृतम् । एवं च सृष्ट्यर्थं ब्रह्मललाटादुत्थितं तमभिप्रेत्य 'ब्रह्मा सुरगुरुः स्थाणुर्मनुश्च परमेष्ठिनः' इत्यारभ्य 'एकविंशतिरुत्पन्नास्ते प्रजापतयः स्मृताः' इति प्रजापतिषु परिगणनं कृतम् । तस्यैव च ब्रह्मसभायां तदुपसर्जनतयावस्थानमादिपर्वण्युक्तम् । तत्र हि 'तत्र विष्णुर्महादेवस्तत्राग्निर्वायुना सह । ऋषयः सर्व एवैते पितामहमुपासते ॥' इत्युक्तम् । तदपि स्थाणुविषयमिति तत्रैव ब्रह्मसदसि देवान्प्रदक्षिणीकुर्वाणां तिलोत्तमां परितो द्रष्टुं तेन परितो मुखचतुष्टयं सृष्टमित्यग्रिमवचने स्थाणुशब्देनैव स्पष्टीकृतम्— 'एवं चतुर्मुखः स्थाणुर्महादेवोऽभवत्पुरा' इति । यत्तु द्रोणपर्वणि ब्रह्माणं प्रति शिववचनम्— 'भवता हि नियुक्तोऽहं

प्रजानां परिपालने' इत्यादि, तदपि स्थाणुविषयमित्येतत् 'ततो हरो जटी स्थाणुः' इत्युपक्रमेण प्रकाशितम् । मोक्षधर्मेषु— 'एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ मम । मया दर्शितपन्थानौ सृष्टिसंहारकारकौ ॥' इत्यादिनारायणवचने शिवस्य तन्नियम्यत्ववचनमपि विभूतिविषयमेतत्क्रोधजत्वविशेषणेन दर्शितम् । एवमन्यत्रापि तत्र तत्र निकर्षवचने विभूतिविषयत्वज्ञापकं ब्रह्मपुत्रत्वादिविशेषणं प्रयुक्तं द्रष्टव्यम् । एवं भारते क्वचित्क्वचिच्छिवनिकर्षवचनानां तद्विभूतिविषयत्वस्य तत्र तत्र प्रयुक्तैर्वैशेषिकपदैः सूचितत्वान्न कश्चिद्विरोध इति ॥ ८ ॥

यत्र क्वचित्क्वचिदेतादृशं वैशेषिकपदं नास्ति यथा पञ्चेन्द्रोपाख्याने पञ्चेन्द्रानसुरावताररूपकर्णदुर्योधनादिवधार्थं मनुष्यलोके जायध्वमिति नियुक्तवतः शिवस्य नारायणोऽप्यंशेनावतीर्य तेषां साहायकं करोत्वित्यभिप्रायेण नारायणोपसमर्पणमुक्तं तत्रैवमादिषु गतिमाह—

यत्रेदृशं नास्ति विभूतिरुद्रता-
विज्ञापकं नाथ विशेषकं पदम् ।
सापि स्वधर्मग्रहमानवैशसा-
त्सर्वेश्वरं त्वां न निकर्षगीः स्पृशेत् ॥

श्रीमहाभारते खलु श्रीसाम्बशिवत्रिमूर्त्युत्तीर्णत्रिमूर्त्यादेः कृत्स्नस्यापि चराचरस्य प्रपञ्चस्य स्रष्टा पाता नियन्ता संहर्ता समाराधनीयश्च प्रतिपन्नः । भारतशेषे हरिवंशे च शकटपरिवृत्त्या भीतेन नन्दगोपेन कृष्णरक्षायै प्रयुक्ते कवचे— 'विष्णुस्ते पूर्वतः पातु रुद्रो रक्षतु दक्षिणम् । ब्रह्मा च पश्चिमं पायात्स्कन्दो रक्षत्वथोत्तरम् ॥ उपरिष्टात्तथा सूर्यः पात्वधश्चापि वासुकिः । पायाच्च त्वामधो वत्स शिष्टाः काष्ठाः समीरणः ॥ स्वस्ति करोतु भगवान्पिनाकी वृषभध्वजः । गावो रक्षन्तु सर्वत्र भूमिं पातु सदाशिवः ॥' इति ब्रह्मविष्णुरुद्रेभ्यः शिवः पर इति प्रतिपादितम् । तथाभूतं निकर्षगीः कापि न स्पृशेत् । किं तु बहुषु निकर्षवचनेषु विभूतिविषयत्वज्ञापकस्थाणुविशालाक्षादिशब्दसत्त्वादौचित्याच्च तत्तद्विभूतिविशेषानेवावलम्बत इत्यर्थः ॥ ९ ॥

ननु गीतासु श्रीकृष्णेन स्वस्यैव परब्रह्मभावचिह्नमधिकं माहात्म्यं बहुधा प्रपञ्चितम्, तद्विरोधपरिहारः कथमित्याकाङ्क्षायामाह—

गीतासु गूढमुदितं भवतः परत्वं
नैव स्फुटं तदत एव हि सव्यसाची ।

गीतार्थमेव सहसा पुनरप्यपृच्छ-
त्तद्बोधनार्थमुदिता हरिणानुगीता ॥

आश्वमेधिके पर्वण्यनुगीतोपक्रमे— 'विदितं ते महाबाहो संग्रामे समुपस्थिते । माहात्म्यं देवकीपुत्र तच्च ते रूपमैश्वरम् ॥ यत्तु तद्भवता प्रोक्तं तदा केशव सौहृदात् । तत्सर्वं पुरुषव्याघ्र नष्टं मे व्यप्रचेतसः ॥ मम कौतूहलं त्वस्ति तेष्वर्थेषु पुनः पुनः । भवांश्च द्वारकां गत्वा नचिरादेव केशव ॥' इत्यर्जुनस्य प्रश्ने भगवतानुगीतोपदेशः कृतः । तस्यायमनुवादः ॥ १० ॥

ननु गीतासु श्रीकृष्णेन शिवस्य पारम्यं प्रतिपादितं तदनन्तरं सम्यगर्जुनेन गृहीतामिति पुनस्तद्विषयः प्रश्नोऽयमित्युदाहृतप्रश्नाभिप्रायकथनं पूर्वश्लोककृतं न युज्यते; अर्जुनेन हि युद्धारम्भसमये त्वयोपदिष्टं तव माहात्म्यं तदा विदितमिति खलु प्रश्नोपक्रमे पार्थेनोक्त्वा तद्विस्मृतमिति श्रीकृष्णं प्रति पुनः पृष्टमित्याशङ्क्य पार्थस्य गीताश्रवणसमये संशयहेतुमुद्घाट्य स्वाभिमतं प्रश्नाभिप्रायमाविष्करोति—

तमेव चाद्यं पुरुषं प्रपद्य इ-
त्युदीरितं यन्मधुकैटभाद्विषा ।

तमेव सर्वान्भ्रमयन्तमीश्वरं
महाफलाप्त्यै शरणं व्रजेति यत् ॥ ११ ॥

एतेन कृष्णस्य समं मुमुक्षुणा
स्वाराधनीयः प्रतिभासते परः ।
सर्वस्य चाहं हृदि संनिविष्ट इ-
त्याद्यैस्तु विष्णुस्तदुदेति संशयः ॥ १२ ॥

गीतासु 'ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः । तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥' इति कृष्णवचनं दृश्यते । अत्र 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥' इति प्राज्ञ ईश्वरः पुरुष इत्युक्तः सर्वस्य प्रपदनीय इत्युक्तमपि प्रतीयते । तमेव मया शरणीकृतमीश्वरं त्वमपि शरणं भजेत्येवमर्जुनं प्रति 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ तमेव शरणं गच्छ सर्वभावेन भारत । तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥' इत्यनेनोपदिष्टमिति प्रतीयते, 'यस्मिन्गता न निवर्तन्ति भूयः' 'स्थानं प्राप्स्यसि शाश्वतम्' इति एकफलोपदेशात् 'उत्तमः

पुरुषस्त्वन्यः—' इति श्लोके समानाधिकरणयोः शब्दयोरेकत्र पुरुषशब्दोऽन्यत्रेश्वरशब्द इत्यनयोरैकार्थ्यप्रतीतेश्च । एवं तावत्कृष्णेन गीतासु निरतिशयमहिमशालितयोक्तस्य स्वस्यापि प्रपदनीयत्वेन वर्णितः ' शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ' इत्युक्तवन्तमर्जुनं प्रत्यपि मोक्षार्थं प्रपदनीयत्वेनोपदिष्ट ईश्वरनाम्ना पुरुषान्तरस्पर्शरहितेन धिया मानितः शिव एव परं ब्रह्मेति विवक्षित इति प्रतीयते । गीतासु कृष्णेन सर्वकारणत्वसर्वान्तर्यामित्वादीनि बहूनि ब्रह्मलिङ्गानि स्वस्मिन्वर्णितानीति स्वयमेव परं ब्रह्मेत्युपदिष्टम् । एवं कोटिद्वयोत्थानात्संशय एवात्रोचितः । न च कृत्स्नगीताश्रवणानन्तरम् ' स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ' इत्युक्तवतोऽर्जुनस्य कथं संशय उच्यत इति शङ्कनीयम् , तस्य स्वकीयैर्युद्धं कर्तुमुचितमनुचितं वेति संदेहनिवृत्त्या युद्धं करिष्य इत्येतदर्थकत्वात् । अन्यथा ' सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ' इति कृष्णवाक्यसमनन्तरमेव ' स्थितोऽस्मि गतसंदेहः ' इत्यस्य प्रवृत्तेः त्वां शरणं व्रजेयमन्यं वेति संदेहो निवृत्तः, ' सर्वधर्मान्परित्यज्य ' इति त्वद्वचनमेव करिष्यामीत्येतदर्थप्रतीतेः । न चेष्टापत्तिः, ' करिष्ये वचनं तव ' इत्युक्त्यनन्तरमप्यर्जुनस्य

यावज्जीवं शिवपूजानिष्ठत्वात् । एवं चानुगीतारम्भगतार्जुन-प्रश्नोपक्रमे 'विदितं ते महाबाहो संग्रामे समुपस्थिते । माहात्म्यं देवकीपुत्र तच्च ते रूपमैश्वरम् ॥' इति गीतोपदेशेन कृष्णस्य परभावरूपं माहात्म्यं विदितमिति यदुक्तं तत्तदा न गृहीतमिति गुरुं प्रत्यभियोक्तुं पुनः प्रश्नावसरार्थं गृहीतमेव विस्मृतमिति नष्टशब्देनोक्तमिति योजनीयमिति भावः ॥ ११ ॥ १२ ॥

गीतोपदिष्टार्थानिश्चयः प्रागर्जुनस्य नासीदित्येतदुदाहृतप्रश्नोत्तरेण श्रीकृष्णवाक्येनाप्यवसीयत इत्याह—

इत्थमस्य यदि संशयो भवे-
दन्यथाग्रहणमेव वा पुनः ।
नाग्रहीन्मदुपदिष्ट एष इ-
त्यग्रहं हरिरवोचदुत्तरे ॥ १३ ॥

इत्थं हि तत्रोत्तरारम्भः— 'श्रावितस्त्वं मया गुह्यं श्रापितश्च सनातनम् । धर्मस्वरूपिणं पार्थ सर्वाँल्लोकांश्च शाश्वतान् ॥ अबुद्धया यन्न गृह्णीथास्तन्मे सुमहदप्रियम् । नूनमश्रद्दधानोऽपि दुर्मेधाश्चासि पाण्डव ॥ स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने ॥' इति । अत्र गृहीतं नष्टमित्य-

र्जुनस्य वाचा गृहीतस्य विस्मृतत्वोक्तिं श्रुत्वापि यत् 'अबुद्ध्या यन्न गृह्णीथाः' इति कृष्णेन तस्याग्रहणमेवोक्तं तस्यायमाभिप्रायः— गीतोपदिष्टमर्थरहस्यं तदा ग्रहीतुमशक्त एव स्वस्मिन्नुपदेशायोग्यत्वप्रतीतिर्भवेदिति भीत्या विदितामित्युक्त्वा पुनः प्रभावसरार्थं नष्टमित्याह । तस्य यदि संशयो यदि वा मामेवाहं परं ब्रह्मोपदिशामीति तस्य मतिः, उभयथापि मदुपदिष्टार्थतत्त्वग्रहणं नास्तीति । तत्र च युद्धारम्भवैयग्र्यकृतो बुद्ध्यैकाग्र्याभावो मूलम् । तदभावे च सर्वधूर्वहे श्रीकृष्णे स्थिते मम किमर्थं वैयग्र्यमिति तद्वैयग्र्यविरोधिश्रीकृष्णविषयविश्वासरूपश्रद्धाभावः स्वयमेव सर्वधूर्वह इति दुरहंकारकृता दुर्बुद्धिश्च मूलम् ॥ १३ ॥

एवमितः परं पुनरुपदेक्ष्यमाणार्थेऽपि तस्याग्रहणं माभूदिति कोपमभिनीय तस्य सुखबोधनार्थं चातुर्यशालिन्यैकयैवोक्तिभङ्ग्या गीतोपदिष्टा, सर्वोऽपि परभावावेदको महिमा न मदीय उक्तः, किं तु मया यः शरणीकृतो मदुपास्यश्च तदीय इति कृष्णेन व्यञ्जितमित्याह—

उक्त्वा च संशयविपर्ययधीर्निरासं
चक्रे हरिश्चतुरया द्रुतमुक्तिभङ्ग्या ।

शक्यं तदद्य न मया भणितुं यथोक्तं
योगाधिरूढमनसा नबहिर्हृशेति ॥ १४ ॥

'स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने' इत्येतत्पर्यन्तोक्त्यनन्तरं कृष्णस्येदं वचनम्— 'न शक्यं तन्मया भूयस्तथा वक्तुमशेषतः। परं हि धर्मं कथितं योगयुक्तेन तन्मया ॥' इति । अत्र योगारूढेनाबहिर्मनसा मया तदा तदुक्तम, इदानीं बहिर्मनसा मया वक्तुं न शक्यमित्युक्तिभङ्ग्या गीतोपदिष्टः सकलोऽपि महिमा न स्वकीयः किं त्वन्यदीय इति स्पष्टीकृतम्, स्वयमेव नित्यं सर्वज्ञं परं ब्रह्मेति कथने योगयत्नानपेक्षणात्। योगयुक्तत्वोक्त्यैव योगमार्गेण शिवाऽहंभावमास्थाय तदीयः सर्वोऽपि महिमा मदीयत्वेनोक्त इत्यपि व्यञ्जितम्। नबहिर्हृशेति नसमासः ॥ १४ ॥

एवं योगं विना वक्तुं न शक्यमित्युक्त्यनन्तरमपि सौहृदस्मरणात्पुनरप्युपदेशेनास्य संशयादिकं सम्यङ्निरसनीयमित्यालोच्य केनचित्सिद्धपुरुषेण काश्यपाय प्राक्तुभ्यं मदुक्तार्थ एवोपदिष्टः, स मया श्रुतः, तमहं वक्ष्यामीति प्रतिज्ञाय काश्यपसिद्धपुरुषसंवादरूपेणेतिहासेन वैराग्यार्थं पूर्वदेहपरित्यागदेहान्तरपरिग्रहप्रकारमिह परत्र च संसारिणो दुःखबाहुल्यं वैराग्यदृढीकरणार्थभावनाविशेषान्विरक्तस्य संसारान्मोक्षो-

पाययोगं चोपदिश्य 'कच्चिदेतत्त्वया पार्थ श्रुतमेकाग्रचेतसा । न तथापि रथस्थः किं श्रुतवानेतदेव हि ।' इति भगवानुपसंजहार । तदर्थं संगृह्णाति—

अधुना तदुपास्यसंशया-
पगच्छात्विति सौहृदं स्मरन् ।
इति होक्तमिह श्रुतं मये-
त्युपदेश्ये कियदाह तत्र सः ॥ १५ ॥

एवमेवोपदेशद्वारा गीतार्थे कृष्णेन स्वस्य श्रवणकर्तृत्वोक्त्या तत्प्रतिपाद्यबहिर्भावो दर्शितः ॥ १५ ॥

अथ तत्र मननकर्तृत्वोक्त्यापि तं दर्शयति—

तस्य स्थिरीकरणमात्मनि पूर्ववृत्तं
स्वस्यैव बुद्धिमनसी द्विजदम्पती च ।
कृत्वानुयोजनतदुत्तरयोरनुक्त्वा
विख्याप्य तद्विवरणं च चकार शौरिः ॥

पूर्वोतेहासकल्पनया परिनिष्पन्नमर्थजातं मनसा सर्वमालोक्येदमित्थमेवेति तस्य स्वबुद्धौ स्थिरीकरणं पूर्वं स्वेन कृतं

कयाचित्कल्पनाभङ्ग्या दर्शितवान् । सा चेयं कल्पनाभङ्गी —यत्स्वकीये बुद्धिमनसी द्विजदम्पती कल्पयित्वा 'ब्राह्मणी ब्राह्मणं कंचिज्ज्ञानविज्ञानपारगम् । दृष्ट्वा विविक्त आसीनं भार्या भर्तारमब्रवीत् ॥' इत्यादिना ब्राह्मण्याः प्रश्नमवतार्य तदुत्तरे ब्राह्मणोक्ते प्राचीनेतिहासार्थं सर्वं निवेश्य तदवधारणानन्तरम् 'यदिदं ब्रह्मणो लिङ्गं क्षेत्रज्ञ इति कीर्तितम् । ग्रहीतुं येन तच्छक्यं लक्षणं तस्य तद्वद ॥' इति श्लोकेन बन्धमुक्तिफलभाजः शरीरातिरिक्तस्य क्षेत्रज्ञस्य ग्रहणोपायं वदेति ब्राह्मण्याः पुनः प्रश्नान्तरमवतार्य ब्राह्मणेनोक्तस्तदुपायोऽपि दर्शितः । तदनन्तरम् 'क नु सा ब्राह्मणी कृष्ण क चासौ ब्राह्मणर्षभः । याभ्यां सिद्धिरियं प्राप्ता तावुभौ वद मेऽच्युत ॥' इत्यर्जुनेन पृष्टस्य कृष्णस्योत्तरमुपवर्णितम् 'मनो मे ब्राह्मणं विद्धि बुद्धिं मे विद्धि ब्राह्मणीम् । क्षेत्रज्ञ इति यश्चोक्तः सोऽहमेव धनंजय ॥' इति ॥ १६ ॥

एवं भगवता कृष्णेन स्वस्य गीतोपदिष्टपरब्रह्मविषयश्रवणमननवस्त्वमुपाख्यानद्वयकल्पनेन प्रपञ्चितम् ॥ अथ तेन स्वस्य तत्र श्रुते मते च परब्रह्मणि मनोनियमनं तदुपयुक्तभक्तिस्थैर्यार्थं मनसा परब्रह्मभावलिङ्गभूतनिखिलतन्महिमावधारणम् , तस्य श्रुतिसिद्धब्रह्मलक्षणभूतजगत्कारणताशा-

लित्वम्, स्वस्यापि तत्सृष्टत्वं कर्मानुष्ठानसहितया तदुपासनया स्वस्य हृदयग्रन्थिविप्रमोक्ष इत्येतत्सर्वमर्जुनमवगमयितुं गुरुशिष्यसंवादरूपमुपाख्यानान्तरं कल्पितम्, यच्च तत्र तौ गुरुशिष्यावहं मम मनश्चेति पश्चाद्विवरणं कृतं तदर्थं संगृह्णाति—

अग्रे तत्त्वं परं किं
त्वहमपि च कुतः सर्वभूतानि चेति
प्रश्ने शिष्यस्य तस्मै
गुरुकृतमखिलं ब्रह्मतत्त्वोपदेशम् ।
मोक्षं शिष्यस्य चोक्त्वा
पुनरपि विजयेनानुयुक्तो गुरुः कः
शिष्यो वेति स्वमेवे-
श्वर गुरुमवदत्स्वस्य चित्तं स्वशिष्यम् ॥

एवं कृष्णकल्पितोपाख्यानद्वयाभिप्रायं सर्वमवधारितवतोऽर्जुनस्य 'ब्रह्म यत्परमं वेद्यं तन्मे व्याख्यातुमर्हसि । भवतो हि प्रसादेन सुसूक्ष्मे रमते मतिः ॥' इति प्रश्नानन्तरं परब्रह्मस्वरूपमुपदेष्टुकामेन कृष्णेन शिष्याचार्यसंवाद-

रूपः कश्चन कल्पितेतिहासः प्रवर्तितः— 'कश्चिद्ब्राह्मण-मासीनमाचार्यं संशितव्रतम् । शिष्यः पप्रच्छ मेधावी किं स्वित्परतरं तव ॥' इत्युपक्रम्य 'कुतश्चाहं कुतश्च त्वं तत्सर्वं ब्रूहि यत्परम् । कुतो जातानि भूतानि स्थावराणि चराणि च । केन जीवन्ति भूतानि तेषां स्यात्कुत्र वा लयः ॥' इत्यादिना शिष्यकृताः केचन प्रश्ना उपन्यस्ताः । तेषामुत्तरं वक्तुकामस्याचार्यस्य 'ब्रह्म प्रोक्तमिदं धर्ममृषिप्रवरसेवितम् । वेदविद्यासमावापं तत्त्वभूतार्थभावनम् । भूतभव्यभविष्या-दिधर्मकामार्थनिश्चयम् । सिद्धसंघपरिज्ञातं पुराकल्पं सनात-नम् ॥ प्रवक्ष्यामि महाप्राज्ञ पदमुत्तममद्य ते । बुद्ध्वा यदिह संदिग्धा भविष्यन्ति मनीषिणः ॥' इति तदुत्तरोक्तिप्रतिज्ञा-मुपन्यस्य तत्र श्रोतुरत्यादरसिद्धये महर्षीणां चतुर्मुखस्य च संवादरूपमत्र विषये महदुपाख्यानमाचार्येणोपदिष्टमिति त-दुपाख्यानमुखेन शिष्यप्रश्नविषयसकलार्थोपदेशः कृतः । त-न्मध्ये यत्स्वस्य विष्णोश्च महिमवर्णनपरं देवर्षीन्प्रति ब्रह्मव-चनम्— 'सर्वेषामपि भूतानामहं ब्रह्ममयो महान् । भूतं परतरं मत्तो विष्णोरपि न विद्यते ॥ राजाधिराजः सर्वेषां विष्णुर्ब्रह्ममयो महान् । ईश्वरं तं विजानीमः स विभुः स प्रजापतिः ॥ देवदानवभूतानां पिशाचोरगरक्षसाम् । नर-

किंनरयक्षाणां सर्वेषामीश्वरः प्रभुः ॥ आदिर्विश्वस्य जगतो विष्णुर्ब्रह्ममयो महान् ॥' इति । तेन कुतश्चाहं कुतश्च त्वमिति प्रश्नस्योत्तरं निर्गतम् । ब्रह्ममय इति मयटा ह्यभ्यस्तेन ब्रह्मकार्यं विष्णोरुक्तम् । स एव च भगवान्कृष्णः । न च तत्र मयटः स्वरूपार्थकत्वं युक्तम् , अधिकार्थाभावे वैयर्थ्यप्रसङ्गात् , चतुर्मुखे प्रयुक्तस्य ब्रह्ममयशब्दस्य ब्रह्मकार्यत्वार्थकतया तत्प्रायपाठविरोधापत्तेश्च । एवं ब्रह्मर्षिदेवसंवादरूपोपाख्यानोपन्यासानन्तरं गुरोः शिष्यं प्रति वचनम्— ' त्वमप्येवं महाभाग यथोक्तं ब्रह्मणो वचः । सम्यगाचर शुद्धात्मा ततः सिद्धिमवाप्नुहि ॥ इत्युक्तः स तदा शिष्यो गुरुणा धर्ममुत्तमम् । चकार सर्वं कौन्तेय ततो मोक्षमवाप्तवान् ॥ कृतकृत्यश्च स तदा शिष्यः कुरुकुलोद्वह । तत्पदं समनुप्राप्तो यत्र गत्वा न शोचति ॥' इति । तदनन्तरम् ' कोऽन्वसौ ब्राह्मणः कृष्ण कः स्विच्छिष्यो जनार्दन । श्रोतव्यं यन्मयैतद्धि तन्ममाचक्ष्व हे विभो ॥' इत्यर्जुनप्रश्ने श्रीकृष्णवचनम्— ' अहं गुरुर्महाबाहो मनः शिष्यं हि विद्धि मे । त्वत्प्रीत्या गुह्यमेतच्च कथितं ते धनंजय ॥ मयि चेदस्ति ते प्रीतिर्नित्यं कुरुकुलोद्वह । अध्यात्ममेतच्छ्रुत्वार्थं सम्यगाचर सुव्रतः ॥ ततस्त्वं सम्य-

गाचीर्णे धर्मेऽस्मिन्कुरुनन्दन । सर्वकामविशुद्धात्मा मोक्षं प्राप्स्यसि केवलम् ॥ इति । एतदर्थः सर्वोऽप्यत्र संगृहीतः ॥ १७ ॥

एवं पार्थः प्रागगृहीतं गीतार्थमिदानीन्तनविवरणानुसारेण गृह्णात्वित्यभिप्रेत्य कृष्णेनानुगीतासु गीताशयविवरणं कृतमित्येतत्कृतविवरणानुसारेण परिनिष्पन्नं गीतार्थं प्रदर्शयन्नाह—

ब्रह्मण्येवं स्वचेतोनियमनसमुप-
स्थापितं ग्रन्थिमोक्षं
स्वेनैवोक्तं विमृश्य प्रपदनवचनं
तत्प्रतीतार्थनिष्ठम् ।
यत्तत्सर्वस्य चाहंहृदिमुखवचनं
तत्पुनः शास्त्रदृष्ट्ये-
त्येवं पार्थोऽवगच्छेदितिविवृतिरका-
र्यत्र गीताशयस्य ॥ १८ ॥

अनुगीता तावद्गीताशयविवरणार्थेति स्पष्टम्, तथैव तदुपक्रमात् 'पूर्वमप्येतदेवोक्तं युद्धकाल उपस्थिते । मया तव महाबाहो तस्मादत्र मनः कुरु ॥' इति तदुपसंहाराच्च ।

तत्र गुरुशिष्योपाख्यानव्याजेन स्वस्य परब्रह्मप्रपदनादेव हृद्-यग्रन्थिविप्रमोक्षपूर्विका सिद्धिर्जातेति स्पष्टमेवोक्तम् । अतस्त-दनुसारेण 'तमेव चाद्यं पुरुषं प्रपद्ये' इत्येतदेव स्वार्थनिष्ठम् । कृष्णेन चाहंभावेन ब्रह्मोपदेशो यः कृतः स सर्वोऽपि शास्त्रदृष्ट्या, 'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपा-स्स्व' इति प्रतर्दनायेन्द्रकृतस्वात्मब्रह्मभावोपदेशवद्ब्रह्माहंभाव-भावनाप्रयुक्तो न स्वात्मब्रह्मभावनाशयप्रयुक्त इति । यद्यपि 'तमेव चाहं पुरुषं प्रपद्ये' इत्येकं वचनमनुरुध्य कृष्णस्य ब्रह्माहंभाववचनानामन्यथानयनमयुक्तमिव, तथापि कृष्णे-नैवानुगीतासु प्रपञ्चेन कृतं गीताशयविवरणमनुरुध्य युक्त-मेवेति भावः ॥ १८ ॥

एवं गीताप्रपञ्चितबहुमहिमशालिनः कृष्णस्यापि समाश्र-यणीयत्वेन तस्यां प्रतिपादितं यद्ब्रह्म तत्परमशिव एवेत्युप-संहरंस्तत्र शङ्कास्पदं विरोधं परिहरति—

तच्च ब्रह्म प्रपत्त्यास्पदमसुररिपो-
रीश्वरत्वं न चान्यो
नाहं कांचित्प्रपद्ये विबुधमिति वचः
श्रोतुरुत्कृष्टभक्त्यै ।

सेवन्ते नीलकण्ठं परिमितफलदं
न प्रबुद्धा इतीदं
ब्रह्मैक्यध्यातृविद्वद्विषयमितरथा
नास्ति भूयोऽनुरोधः ॥ १९ ॥

'तमेव चाद्यं पुरुषं प्रपद्ये' इत्यत्र प्रपदनीयपरब्रह्मपरस्य पुरुषशब्दस्य 'बिभर्त्यव्यय ईश्वरः' 'ईश्वरः सर्वभूतानाम्' इतीश्वरनाम्नोपस्थिते शिव एव पर्यवसानं युक्तम्, न देवतान्तरे । तदेतत्प्रागेव प्रपञ्चितम् । तत्रेयमाशङ्का भवति— 'अनाश्रित्योच्छ्रयो नास्ति मुखमाश्रयमाश्रयेत् ॥ रुद्रं समाश्रिता देवा रुद्रो ब्रह्माणमाश्रितः । ब्रह्मा मामाश्रितो राजन्नाहं कंचिदुपाश्रये ॥' इति युधिष्ठिरं प्रति कृष्णवचनेन तस्य समाश्रयणीय एव नास्तीति प्रतिपन्नम्, मोक्षधर्मे 'ब्रह्माणं नीलकण्ठं च याश्चान्या देवताः स्मृताः । प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम् ॥' इति परिमितफलत्वेन शिवस्य प्रतिबुद्धसेव्यत्वं निवारितम्; कथं कृष्णेन शिवस्य समाश्रयणीयत्वमुच्यत इत्यत्रेदमुत्तरम् । 'नाहं कंचिदुपाश्रये' इति कृष्णवचनं प्रागेव स्वभक्तं वैष्णवैरनुष्ठेयान्वैष्णवधर्मान्पृष्टवन्तं युधिष्ठिरं प्रति तद्धर्मनिरूपणार्थमेव प्रवर्तितस्य वैष्णवधर्मशास्त्रस्यावसाने खल्विदं श्रूयते

अतः 'न बुद्धिभेदं जनयेत्—' इति न्यायेन स्वस्मिन्युधिष्ठिरस्य प्राक्सिद्धभक्तेरभिवृद्धये तत्प्ररोचनार्थम् 'नाहं कंचिदुपाश्रये' इति वचनम् । 'ब्रह्माणं नीलकण्ठं च—' इत्यादिवचनं त्वहंग्रहोपासनानिष्ठाविद्वद्विषयम्, 'प्रतिमास्वल्पबुद्धीनाम्' इत्यादिवचनैकार्थ्यात्, शेषत्वानुसंधानगर्भायाः सेवाया ऐक्यानुसंधानविरोधित्वाच्च । एवमर्थकत्व एवानयोर्वचनयोर्भूयोवचनानुरोधो भवति । भूयोनुग्रह एव च न्याय्यः । भूयांसि खल्वनुगीतावचनानि 'तमेव चाद्यं पुरुषं प्रपद्ये' इत्यस्य प्रतीतार्थपरत्वव्यवस्थापकानि । भूयांसि च भारतपर्वसु हरिवंशे च विष्णोः शिवाराधकत्वप्रतिपादकानि । ननु कर्णपर्वणि 'विष्णुरात्मा भगवतो भर्गस्यामिततेजसः । तस्माद्धनुर्ज्यासंस्पर्शं संविषेहे महेशितुः ॥' इति त्रिपुरविजयोपाख्यानगतवचनेन 'यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु । आवयोरन्तरं नास्ति शब्दैरर्थैर्जगत्पते ॥ नामानि तव गोविन्द यानि लोके महान्ति च । तान्येव मम नामानि नात्र कार्या विचारणा ॥' इति हरिवंशे कृष्णं प्रति शिववचनेनान्यैश्चैवंभूतवचनैः परब्रह्मभूतशिवाभिन्नतया नित्यावाप्तसमस्तकाम इति त्वयाप्येष्टव्यम् ; तथा च कथमस्य 'भक्तं हि मां भजमानं भजस्व' 'तमेव चाद्यं पुरुषं प्रपद्ये' इत्या-

दिवचनमनुसृत्याभ्युदयनिःश्रेयसार्थं शिवप्रपदनमुच्यत इति चेत्; सत्यम्, तथाप्यन्येषामभ्युदयनिःश्रेयसार्थं प्रपदनं स्वस्यापि मूलमूर्तिः शिव इति तन्महिमातिशयप्रख्यापनार्थं च लोकानुजिघृक्षोः सकलधर्मप्रवर्तकस्य विष्णोः शिवप्रपदनमेष्टव्यमेव । तथैव हि मोक्षधर्मे कौर्मे च श्रीकृष्णवचनम्— 'मया प्रमाणं हि कृतं लोकस्तदनुवर्तते । न हि देवोऽस्ति कश्चिन्मे वरः पाण्डवनन्दन ॥ इति संचिन्त्य मनसा पुराहं विश्वमीश्वरम् । पुत्रार्थमाराधितवानहमात्मानमात्मना ॥' इति, 'नैव पश्यन्ति तं देवं मोहिता मम मायया । ततोऽहं स्वात्मनो मूलं ज्ञापयन्पूजयामि तम् ॥ इति च । तस्मात् 'नाहं कंचिदुपाश्रये' इत्यस्य मदुक्ताभिप्राय एवान्वेष्टव्यः । तथाश्वमेधिके पर्वणि वैष्णवधर्मानेव पृष्टवन्तं युधिष्ठिरं प्रति तानेवोपदेष्टुं कृष्णेन प्रवर्तिते वैष्णवधर्मशास्त्रे 'कथं वैखानसा ब्रूयुः कथं वै पाञ्चरात्रकाः' इत्यादिना केवलं वैष्णवधर्मानेव पुनः पुनः पृच्छ्यमानेनापि तस्य शिवस्य चाराधनं तुल्यविकल्पतया तुल्यफलतयैव दर्शितः । यथा 'निवेशयति मन्मूर्त्या आत्मानं मां नरः शुचिः । रुद्रं दक्षिणमूर्त्या वा चतुर्दश्यां विशेषतः ॥ सिद्धैर्ब्रह्मर्षिभिश्चैव देवलोकैश्च पूजितः । गन्धर्वैर्भूतसंघैश्च गीयमानो महातपाः ॥ प्रविशेत्स महातेजा मां वा शंकर-

मेव वा । न स्यात्पुनर्भवो राजन्नात्र कार्या विचारणा ॥ विष्णवे स्नपनं यस्तु मम कुर्याद्वरस्य वा । अर्चनं च यथान्यायं तस्य पुण्यफलं शृणु ॥ दशजन्मकृतं पापं तस्य सद्यो विनश्यति । दशानामश्वमेधानामिष्टानां लभते फलम् । विमानं दिव्यमारूढः कामरूपी यथासुखम् । दिव्यवर्षसहस्राणां कोटिमेकां प्रमोदते ॥ ततश्चापि च्युतः काला-दिह लोके द्विजोत्तमः । चतुर्णामपि वेदानां पारगो ब्रह्मविद्भवेत् ॥ चन्द्रसूर्यग्रहे धाम्नि मम वा शंकरस्य वा । गायत्रीं मामिकां वापि जपेद्यः शंकरस्य वा ॥ शङ्खतूर्यनिनादैश्च कांस्यघण्टास्वनैरपि । कारयेत्तद्ध्वनिं भक्त्या तस्य पुण्यफलं शृणु ॥ स गच्छेद्दक्षिणां मूर्तिं मां वा नात्र विचारणा ॥' इति । एवं स्वभक्तं युधिष्ठिरं प्रति स्वभजनशिवभजनयोः साम्यमुक्त्वापि वस्तुवृत्तमनुरुध्य शिवभजनस्याधिक्यं सूचितम् । तत्र हि ' विशेषतीर्थं सर्वेषामशक्तानामनुग्रहात् । भक्तानां तारणार्थं वै वक्तुमर्हसि धर्मतः ॥' इति भगवत्सेवां कर्तुमशक्तानां भक्तानां तदनुकल्पतया सेवनीयं तीर्थं किमिति प्रश्ने तस्य प्रतिवचने ' सत्यस्य वचनं तीर्थमहिंसा तीर्थमुच्यते । तपस्तीर्थं दया तीर्थं शीलं तीर्थं युधिष्ठिर ॥ मद्भक्तः सकलं तीर्थं शंकरस्य विशेषतः ॥' इति स्वभक्तापेक्षयापि शिवभक्तस्य विष्णुभक्तान्प्रत्यधिकतीर्थत्वमुक्तम् । आरण्यपर्वणि

च तीर्थयात्राविधौ केषुचिच्छिवक्षेत्रेषु शिवार्चकस्य 'गाणपत्यमवाप्नुयात्' इति महाभ्युदयहेतुत्वमुक्तम् । केषुचित्तदर्चनस्य 'परां गतिमवाप्नुयात्' इति निःश्रेयसहेतुत्वमुक्तम् । एवंविधभूयोवचनानुग्रहात् 'ब्रह्माणं नीलकण्ठं च' इति वचनस्याप्युक्त एवाभिप्रायोऽन्वेष्टव्यः । तस्य नारायणातिरिक्तदेवताभजनं परिमितफलमिति ज्ञातारस्तान्न सेवन्त इत्यर्थकत्वेऽपि नारायणसेवाप्ररोचनार्थं तदिति नेतव्यम् । भूयोवचनानुरोधमनादृत्य यथाश्रुतार्थग्रहणे च 'गोप्रतारं ततो गच्छेत्सरय्वास्तीर्थमुत्तमम् । तत्र रामो गतः स्वर्गं सभृत्यबलवाहनः । देहं त्यक्त्वा दिवं यातः स्थास्यतीन्द्रस्य वैभवात् ॥' इति गोप्रतारतीर्थमहिम्ना श्रीरामस्य स्वर्गप्राप्तिवचनात्, सभापर्वणि यमसभावर्णने 'तस्यां राजर्षयः पुण्यास्तथा देवर्षयोऽमराः । यमं वैवस्वतं तात प्रहृष्टाः पर्युपासते ॥ ययातिर्नहुषः पूरुर्मान्धाता सगरो नृगः ॥' इत्यारभ्य स्वर्गप्राप्त्यनन्तरं यमसभायामवस्थाय तमुपासीनानां राजर्षीणां परिगणनेन 'रामो दशरथश्चैव लक्ष्मणश्च प्रतर्दनः' इति परिगणनेन च सोऽपि कर्माधीनलोकप्राप्तिको जीवविशेषः स्यात् । ततः शार्ङ्गं धनुःश्रेष्ठं करात्प्रापतन्मम ॥ मोहोत्सन्नस्तु कौन्तेय रथोपस्थ उपाविशम् ॥' इत्यारण्यपर्वणि साल्वयुद्धे कृष्णस्य मोहाज्ञानवचनेन सोऽपि जीववि-

शेषः स्यात् । तस्मात्कृत्स्नमपि भारतं गीतानुगीतामोक्षधर्मवैष्णवधर्मशास्त्रसहितं विशेषवृत्तिनिवृत्त्या शिवपारम्यविश्रान्तं तत्प्रधानमेव भगवता श्रीवेदव्यासेन कृतमित्येतत्सुप्रतिष्ठितमिति सर्वं समञ्जसम् ॥ १९ ॥

अथ कृत्स्नस्य स्तोत्रस्य प्रचयगमनार्थम् 'मङ्गलादीनि–' इत्याद्याप्तवाक्यप्रामाण्यात्स्तोत्रसमाप्तौ शिवपारम्योपदेष्टृ गुरुनमस्काररूपं मङ्गलमाचरति —

इत्थं चक्रे भारतं यः प्रबन्धं
व्यक्त्या व्यासः शांभवोत्कर्षवर्षी ।
ध्वन्यध्वन्यध्वन्यमूर्धन्यधन्य-
स्तं शौरिं तत्साक्षिणं चानतोऽस्मि ॥

इति श्रीभारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य-
श्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनो-
रप्पयदीक्षितस्य कृतिः
श्रीभारतसारसंग्रहस्तोत्रविवरणं
समाप्तम् ।

॥ श्रीः ॥

॥ भारततात्पर्यसंग्रहः ॥

श्रीमदप्पय्यदीक्षितेन्द्रैर्विरचितः

तैरेव विरचितया व्याख्यया

समुद्भासितः



श्रीरङ्गम्

श्रीवाणीविलासमुद्रायन्त्रालये

संमुद्रितः

१९२९